শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী কৃষ্ণচতুর্ব্বিংশতিস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী কৃষ্ণচতুর্ৱিংশতিস্তোত্রম্ ॥

কেশৱং কেশিমথনং ৱাসুকের্ভোগশাযিনম্।
রাসক্রীডাৱিলাসাঢ্যং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **1** ॥

নারাযণং নরহরিং নারদাদিভিরর্চিতম্।
তারকং ভৱবন্ধানাং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **2** ॥

মাধৱং মধুরাৱাসং ভূধরোদ্ধারকং ৱিভুম্।
আধারং সর্ৱভূতানাং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **3** ॥

গোৱিন্দমিন্দুৱদনং শ্রীৱন্দ্যচরণাম্বুজম্।
নৱেন্দীৱরসঙ্কাশং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **4** ॥

ৱিষ্ণুমুষ্ণীষভূষাঢ্যং জিষ্ণুং দানৱমর্দনম্।
তৃষ্ণাভযপ্রভেত্তারং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **5** ॥

মধুসূদনং ৱিধিনুতং বুধমানসৱাসিতম্।
দধিচোরং মহাভাগং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **6** ॥

ত্রিৱিক্রমং ত্রিলোকেশং ভৱদাদিৱিজৈর্নুতম্।
কৱিং পুরাণপুরুষং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **7** ॥

ৱামনং শ্রীমদাকারং কামিতার্থফলপ্রদম্।
রামানুজং সামলোলং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **8** ॥

শ্রীধরং শ্রীধরানুতং রাধেযাদ্যৈর্নুতং হরিম্।
রাধাৱিডম্বনাসক্তং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **9** ॥

হৃষীকেশং ৱিষাৱাসং ভিষজং ভৱরোগিণাম্।
তুষারাদ্রিসুতাৱন্দ্যং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **10**॥

পদ্মনাভং পদ্মনেত্রং পদ্মাহৃৎপদ্ম বল্লভম্।
আধ্মাতমুরলীলোলং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **11**॥

দামোদরং শ্যামলাঙ্গং সোমসূর্যৱিলোচনম্।
চামীকরাম্বরধরং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **12**॥

সঙ্কর্ষণং ৱেঙ্কটেশং ওঙ্কারাকারমৱ্যযম্।
শঙ্খচক্রগদাপাণিং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **13**॥

ৱাসুদেৱং ৱ্যাসনুতং ভাসুরাভরণোজ্জ্ৱলম্।
দাসপোষণসংসক্তং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **14**॥

প্রদ্যুম্নমাম্নাযমযং খদ্যোতনমযার্চিতম্।
ৱৈদ্যনাথং প্রপঞ্চাস্যং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **15**॥

অনিরুদ্ধং ধ্রুৱনুতং শুদ্ধসঙ্কল্পমৱ্যযম্।
শুদ্ধব্রহ্মানন্দরূপং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **16**॥

নরোত্তমং পুরাণেশং মুরদানৱৱৈরিণম্।
করুণাৱরুণাৱাসং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **17**॥

অধোক্ষজং সুধালাপং বুধমানসৱাসিনম্।
অধিকানুগ্রহং রক্ষং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **18**॥

নারসিংহ দারুণাস্যং ক্ষীরাম্বুধিনিকেতনম্।
ৱীরাগ্রেসরমানন্দং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **19**॥

অচ্যুতং কচ্ছপাকারমুজ্জ্ৱলং কুণ্ডলোজ্জ্ৱলম্।
সচ্চিদানন্দৱীর্যাঢ্যং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **20**॥

জনার্দনং ঘনাকারং সনাতনতমং ৱিভুম্।
ৱিনাযকপতিং নাথং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **21**॥

উপেন্দ্রমিন্দ্রাৱরজং কৱীন্দ্রনুতৱিগ্রহম্।
কৱিং পুরাণপুরুষং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **22**॥

হরিং সুরাসুরনুতং দুরালোকং দুরীক্ষণম্।
পরেশং মুরসংহারং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **23**॥

শ্রীকৃষ্ণং গোকুলাৱাসং সাকেতপুরৱাসিনম্।
আকাশকালদিগ্রূপং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **24**॥

কৃষ্ণস্তোত্রং চতুর্ৱিংশমেতৎ সন্নামগর্ভিতম্।
যঃ পঠেৎ প্রাতরুত্থায সর্ৱপাপৈঃ প্রমুচ্যতে॥ **25**॥

কৃষ্ণায ৱাসুদেৱায হরযে পরমাত্মনে।
প্রণতক্লেশনাশায গোৱিন্দায নমো নমঃ॥ **26**॥

॥ ইতি শ্রী কৃষ্ণচতুর্ৱিংশতিস্তোত্রং সমাপ্তম্॥